# ब्रह्मानन्दषट्कम्

डॉ. गोपीकृष्णन्-रघुः*

जन्मान्तरे केशवसङ्गजातां
मुमुक्षुतामाप्य गुरुं प्रपन्नम् ।
गोपालकं कृष्णसखं वरेण्यं
नमामि तं ब्रह्मयतीन्द्रवर्यम् ॥१॥

श्रीरामकृष्णस्य तनूजकल्पं
विवेकसूर्यस्य तु चन्द्रकल्पम् ।
सतीर्थवर्गस्य नरेशकल्पं
नमामि तं ब्रह्मयतीन्द्रवर्यम् ॥२॥

तपस्विनं तप्तजनाभ्रतुल्यं
शिष्यान्वयस्यादिमधूर्वहं वै ।
राजाह्वयं रत्नकिरीटवर्जं
नमामि तं ब्रह्मयतीन्द्रवर्यम् ॥३॥


असङ्गमप्यद्भुतसङ्घदक्षं
कर्मक्षमं कर्मविलेपहीनम् ।
चक्रध्वजं चक्रविनाशहेतुं
नमामि तं ब्रह्मयतीन्द्रवर्यम् ॥४॥

मुक्तोऽपि कारुण्यविशेषहेतोः
जगद्धितेष्वत्यधिकं रमन्तम् ।

* सहायकाध्यापकः, संस्कृतदर्शनविभागस्य, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोध-संस्थानस्य, बेलुडमठस्य ।

सङ्घस्य मुख्यं प्रथमं प्रधानं
नमामि तं ब्रह्मयतीन्द्रवर्यम् ॥५ ॥

चक्राङ्किते मन्दिरसव्यभागे
गङ्गातटे मातुरतीवपार्श्वे ।
भव्यालये केशवपार्श्वसंस्थं
नमामि तं ब्रह्मयतीन्द्रवर्यम् ॥६ ॥



[बेलुडमठे स्वामिब्रह्मानन्दमन्दिरे स्वामिब्रह्मानन्दस्य चित्रम्]